CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

13 P 13.

Coll. No. 412.

Title Vaitaraṇī dāna vidhi

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 412 Subject: Dharma śāstra

Title: Vaitaraṇī dāna vidhi

Author: —— Scribe: Çinoka (?)

Date of the work: —— Date of the Ms.: V.S. १६२४

Place of the work: —— Place of the Ms.: ——

Size: 5.6" by 3.8" Extent: 9. foll.

Language: Sanskrit Script: Devanāgarī

Remarks: ——

श्रीगणेशाय नमः ॥ वैतरणीदानस्य विधिर्लि
ख्यते । तत्रादौ विष्णोः षोडशोपचार पूजा । तत्र प्र
योगः । अद्य अमुकमासे अमुकपक्षे अमुकति
थौ वारे नक्षत्रे योगे करणे अमुकपर्वणि वैतर
णीदानप्रारंभनिमित्तं षोडशभिरुपचारैः विष्णु
पूजनमहं करिष्ये । विष्णुपूजानन्तरं । धर्मराजमूर्ति
रग्न्युत्तारणं प्रतिष्ठापूर्वकं । पंचामृतस्नपनं । ताता
यस्मिन्वृक्षे सुपलाश इत्यनेन मंत्रेण धर्मराजस्य पूजा
ततो ब्राह्मणपादप्रक्षालनं । तत्र प्रयोगः । वैतरणी १॥
दानप्रतिग्रहीत्रे ब्राह्मणाय एतत्ते पाद्यं । एष तेऽर्घः ॥

पूजा । ततो यजमानः विप्रचरणप्रक्षालनानन्तरं स्व
कीयौ चरणौ प्रक्षाल्य आचम्य प्राणायामं त्रयं विष्ण
वे नमो भगवते श्रीवासुदेवाय । अपवित्रः पवित्रो
वा इत्यादि सर्वं प्रयुज्य । ततो वैतरणीदानोपकरणा
णि पवित्रतास्तु । ॐ भूरित्यादि उपास्मै गायता नरः । अद्य
अमुकमास इत्यादि प्रयुज्य वैतरणीदानमहं करि
ष्ये । इति प्रयोगः । ततो ब्राह्मणस्यार्चा । तत्र प्रयोगः
यपादत्रं गंधयुक्तिं वा ईस्पते दाससी अंगिरादे
वते उपानच्छत्रं लंवारुणं कमंडलुस्तिवास्त्रं कुंडले सो

वसोर्मुद्रिकाचार्वेतरत्नादानोपपात्रन्तु ब्राह्मणेनस्वा
हा।सर्वसामग्रीगंधपुष्पं ॐ [illegible] नि:पूजा।अ
न्ये:परिपूर्णतास्तु।आचमनं।अ[illegible]मीमहे तद्दि०
नोक्तनसंकल्पः।ततोविप्रहस्तेपुण्या[illegible]मित्यादि०
ततोयजमानस्यमूर्ध्नि दीर्घमा० उदङ्मुखोब्राह्मणः।
प्रत्यङ्मुखोदक्षिणंजानुपातयित्वा दर्भान्कृतानु
गृहीत्वादेशकालकीर्तनंकुर्यात्।तत्रप्रयोगः।अत्र
जंबूद्वीपेभारतवर्षे आर्यावर्तान्तर्गतब्रह्मावर्तैकदे
शेकुमारिकाखंडे अमुकतीर्थे एवंगुणविशिष्टेदे २।
शे।अद्यब्रह्मणोद्वितीयपरार्द्धे श्रीश्वेतवाराहक
ल्पे

वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे
प्रथमविभागे विक्रमादित्यकालस्य चतुरशीत्य
धिके चतुर्द्दशशतेषु संवत्सरेषु समतिक्रांते
षु अमुकनाम्निसंवत्सरे अमुकायनेऋतौमासेपक्षे
तिथौवारेनक्षत्रेयोगेकरणे अमुकराशिस्थितेस
वितरि अमुकराशिस्थितेचंद्रे ऽस्मिन्स्मिन् इत्यादिषु
भे अमुकपर्वणि एवंगुणविशिष्टेकाले अमु
कसगोत्राय अमुकवेदाध्यायिने अमुकनाम्ने अ
मुकशर्मणे।ब्राह्मणायतुभ्यं अमुकसगोत्रः अ

अमुकनामाऽमुकशर्माहं वैतरणीसंज्ञिकां कृष्णां
गां सवत्सां गंधाद्यर्चितां रुद्रदेवतां सौवर्णशृंगीं रा
जतखुरां ताम्रपृष्ठां कांस्यदोहनीं ... दुकूलच्छ
न्नां व्रीह्यादिसप्तधान्यसहितां द्रोणपरिमितकर्पास त
ता परिमितताम्रभाजनसहितां पालोहदंडउपरिमहि
षास्कंधस्थितमर्घ्यमीराजमूर्तिसहितां पट्टसूत्रब
द्धश्मश्रुदंडनौकास्थितां यमद्वारवर्त्मानां शत
योजनविस्तीर्णां अगाधापूयशोणिततोयां मांस ३॥
कर्दमां अपारदुःखवर्द्धनदं तेन नानाविधैः कृमि
मिश्रितां संकुलां अन्यैश्च मम मे हि रिन्तिं क्रमकर

श्री
शिमारग्राहादिजिह्वलैवरैः प्राणिभिः संकुलां दृष्ट्वा
वेन यावदेवंविधां वितरणीसंज्ञिकां नदीं ...
उत्क्रामः संप्रदानममजो पुंकूलकृशादैस त
हितं विप्रहस्ते दद्यात्। तत्र दक्षिणासंकल्पः॥
पूर्वोक्तविशिष्टदेशकाले च अमुकसगोत्राय
अमुकनामामुकशर्मणे ब्राह्मणाय तुभ्यं प्रमु
कसगोत्रः अमुकनामाहं अस्या वैतरणीदानस्य
स्य परिपूर्णतार्थं इदं पंचसुवर्णपरिमितं अग्नि
देवतं गंधाद्यर्चितं सुवर्णदक्षिणां संप्रददे न मम
अनुमंत्रणं। यमद्वारे महाघोरे या सा वैतरणी न

दी। तां तर्तुं गां ददाम्येतां तुभ्यं वैतरणीमिति। विष्णुरू
पद्विजश्रेष्ठ भूदेव पंक्तिपावन:। सदक्षिणा मया
दत्ता तुभ्यं वैतरणी च गौ:। ब्राह्मणं प्रणम्य सर्वेषां
प्रदक्षिणां कुर्यात्। पुच्छं गृहीत्वा ब्राह्मणेन गंत्वा
कर्षीयत्। तत्र मंत्र:। धेनुके त्वं प्रतीक्षस्व यमद्वा
रमहाभये। उत्तितीर्षुरहं देवि वैतरण्यै न
नामानम:। ततानूयसीर्दक्षिणासंकल्प:। यजमा
नस्य मां गच्छ करणां गांवादिसर्वमुपस्कारजातं ४॥
ब्राह्मणगृहं नायेत्। इति वैतरणीदानविधि: स
माप्त:॥ ॥अनंतरऋणधेनुदानं। विष्णुपूजा॥ ॥

पादप्रक्षालनं। प्राणायाम:। अद्य अमुकमासे
इत्यादि प्रयुज्य ऋणधेनुदानमहं करिष्ये। ब्रा
ह्मणस्य गंधवस्त्रादिभि: पूजा। भोजनसंकल्प:। सु
प्रोक्षितादिकरणं। अत्र इत्यादि वैतरणीदानव
त्प्रयुज्य इमां ऋणधेनुसंज्ञिकां गां सवत्सां गंध
द्यर्चितां रुद्रदैवतां सवत्सां सुवर्णशृंगीं रौप्यखु
रां ताम्रपृष्ठां कांस्यदोहनां देवर्षिपितृसंबंधि
ऋणत्रयापाकरणार्थं संप्रददानमम॥ अस्य ऋ
णधेनुदानस्य प्रतिष्ठासिध्यर्थं। इदं सुवर्णमग्नि

दैवतं गंधाद्यर्चितं दक्षिणां ब्राह्मणाय तुभ्यमहं संप्र
ददानमम॥ ॥इति कृष्णधेनुदानविधिः समाप्तः॥ ॥
अथाष्टौ महादानानि॥ तिलालोहं हिरण्यं च कार्पासं लव
णं तथा॥ सप्तधान्यं क्षितिं गावि एकैकं पावनं स्मृतं॥ अथ
तिलदानं॥ विष्णुपूजा॥ विप्रपादप्रक्षालनं॥ आचमनं॥ प्रा
णायामः॥ अद्य अमुकमासे ऽस्मा द्विप्रमुख्य तिलदानमहं
करिष्ये॥ ब्राह्मणपूजा॥ वस्त्रगंधपुष्पादिभिः॥ जोडन सं
कल्पः॥ सुप्रोक्षितादिकरणं॥ तिलानामनुमंत्रणं॥ तिलाश्च
पितृद्रव्यात्मा सर्वे निर्मिताः पुरा॥ ते मे दहंतु पापानि शरी
रेण कृतानि च॥ ऊँ शऊलाकृतानर्धत्वा॥ अत्राद्येत्यादि प्र

कृ दी

दी

पुण्यअष्टमहादानानां मध्यात् इमान् तिलान् गंधाद्य
र्चितान् सोमदैवत्यान् अमुकसगोत्राय ब्राह्मणाय तुभ्यं
अमुकसगोत्रः अमुकनामाहं परमेश्वरप्रीतिकामः संप्र
ददे न मम॥ अस्य तिलदानस्य समृद्ध्यर्थं इदं सुवर्णं
दक्षिणां ब्राह्मणाय संप्रददानमम॥ ॥इति लोहदाने
तिलदानं समाप्तं॥ ॥अथ लोहदानं॥ तिलदानवत् सर्वं कृत्वा अनुमंत्रणं।
यस्मादायसकर्माणि तवाधीनानि नित्यशः। लांगलादीन्यायु
धान्यतः शांतिं प्रयच्छ मे॥ अद्येत्यादि प्रयुज्य। अष्टानां महा
दानानां मध्ये इदं लोहं अग्निदैवतं गंधाद्यर्चितं धर्म
राजप्रीतिकामस्तुभ्यमहं संप्रददे न मम। अस्य लोह

दानस्यप्रतिष्ठासिद्ध्यर्थं इदं सुवर्णदक्षिणां संप्रददे ॥ न
मम। लोहदानं पूर्णं। अथ हिरण्यदानं। हिरण्यगर्भ
गर्भस्थं हेमबीजं विभावसोः। अनंतपुण्यफलदमतः
शांतिं प्रयच्छ मे। इत्यनुमंत्रणमंत्रः। अष्टानां महादानानां
मध्यात् इदं हिरण्यमग्निदैवतं गंधाद्यर्चितं विष्णुप्री
तिकामस्तुभ्यमहं संप्रददे। नमम। अस्य हिरण्यदान
प्रतिष्ठासिद्ध्यर्थं इदं हिरण्यदक्षिणां संप्रददे। नमम।
कर्पासदानं। येन दत्तेन प्रीयंते भूर्भुवःस्वरिति क्रमात्।
ब्रह्माद्या ऋषयः सार्वभौमकेराद्यागणास्तथा। इंद्राद्यादेव
ताः सर्वे कर्पासेन तु तर्पिताः। अनेन मंत्रेणानुमंत्रणं। इ ६
दं कार्पासं बृहस्पतिदैवतं गंधाद्यर्चितं परमेश्व

रप्रीत्यर्थं संप्रददे। नमम। अस्य कार्पासदानस्य प्रतिष्ठासि
द्ध्यर्थं इदं सुवर्णदक्षिणां संप्रददे। नमम। अथ लवण
दानं॥ तत्रानुमंत्रणं। यस्माद्रसाः सर्वे नोत्कृष्टा लवणं
विना॥ पितॄणां च प्रियं नित्यं तस्मात्स्वर्गप्रदं भवेत्॥ अष्ट
महादानमध्यात् इदं लवणं गंधाद्यर्चितं सोमदैवतं
विष्णुप्रीतिकामः संप्रददे। हिरण्यं दक्षिणा॥ अथ
सप्तधान्यदानं॥ व्रीहयो यवगोधूमा मुद्गा माषाः प्रि
यंगवस्तथा। तिलाः सप्तमाः प्रोक्ताः सप्तधान्यविधौ सदा।
अनुमंत्रणं। अन्नं प्रजापतिः साक्षादन्नमेव जनार्दनः
अन्नाद्भवंति भूतानि जगदन्नेन वर्धते। अष्टमहादानम

म

धान्यानि इमानि व्रीहियवगोधूमादीनि सप्तधान्यानि
गंधपुष्पादिनिरर्चितानि प्रजापतिदैवतानि परमे
श्वरप्रीतिकामः संप्रददे। नमम। अस्य सप्तधान्यदा
नस्य प्रतिष्ठासिद्ध्यर्थं इदं सुवर्णं संप्रददे। नमम॥ ॥ दक्षिणा
अथ भूमिदानं॥ तत्रानुमन्त्रं। समुद्रवसना देवी भूत
धात्री च विष्णुनी। सा मे दहतु पापानि ऊँन्यांतरकृतान्य
पि। इमां भूमिं यथास्थानस्थितां वा गंधपुष्पादिनि
रर्चितां विष्णुदैवतां विष्णुप्रीत्यर्थं तुभ्यमहं संप्रददे।
नमम। अथ गोदानं॥ अनुमन्त्रं। गावो मे अग्रतः ७
गावो मे संतु पृष्ठतः। गावो मे हृदये संतु गवां मध्ये

पा३ ६

वसाम्यहं। अथ महादाने। इमास्तिस्रो गावः रुद्र
देवताः गंधाद्यर्चिताः ऊंगदीश्वरप्रीतिकामः अमुक
सगोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे। नमम। अमुक
सगोत्रः। अमुकनामशर्माहं संप्रददे। नमम। अस्य
गोदानस्य समृद्ध्यर्थं इदं हिरण्यं दक्षिणां संप्रददे।
नमम॥ अथ तिलपात्रदानं। तत्र त्रिंशत्पलं ताम्रपात्रं प्रथ
मपक्षे। द्वितीयपक्षे विंशतिपलं। तृतीयपक्षे द
शपलं। प्रथमपक्षे त्रयः सुवर्णाः पात्रमध्ये क्षिप्यं
ते। द्वितीये द्वौ। तृतीये पक्षे एकः। दक्षिणायां प्रथ
मे। त्रयः मध्यमायां द्वौ। निकृष्टपक्षे एकः॥ ८ तिलस्य

पादप्रक्षालनादिपूजां कृत्वा भोजनसंकल्पं कृत्वा सुभो
क्षितादिकं कृत्वा देशकालौ संकीर्त्य इदं तिलपूर्णंता
म्रपात्रं सस्वर्णं गंधाद्यर्चितं विष्णुदैवतं अमुक
सगोत्राय ब्राह्मणाय तुभ्यं अमुकसगोत्रः अमुकनाम
शर्माहं शास्त्रोक्तफलप्राप्तये संप्रददे। नमम। अस्य
तिलपात्रदानस्य प्रतिष्ठासिद्ध्यर्थं। इदं हिरण्यं द
क्षिणां ब्राह्मणाय तुभ्यमहं संप्रददे। नमम। अथ घृत
पात्रदानं। तत्र कांस्यपात्रं घृतपूर्णं सहिरण्यं द
द्यात्। तत्र प्रयोगः। देशकालौ संकीर्त्य इदं घृ ८
तपूर्णं कांस्यपात्रं सहिरण्यं गंधाद्यर्चितं श

शास्त्रोक्तफलावाप्तये संप्रददे। नमम। अथोपदा
नानि। आसनं। उदकं सुवर्णं। रजतं। वस्त्रं। उपानहौ।
कमंडलुः। छत्रं। यष्टिः। अग्निष्टिका। लोहदंडः। तांबू
लं। चंदनं। व्यंजनं। पुष्पाणि। आदर्शः। एतान्यष्टा
दीन्युपदानानि। ॐ भो नतां स्वल्पदक्षिणा सहिता
नि पुण्यतीर्थे पुण्यकाले च दद्यानि। अन्यच्च यद्य
दिष्टतमं लोके यच्चास्य दयितं गृहे। तत्तद्गुणव
ते देयं तदेवाक्षयमिच्छता। वितरणंधनवतोद्या
नः। पंचसुवर्णदक्षिणा। कृष्णधेनोः अष्टसुवर्णदा

नेषुवशात्क्यनुसार एकः सुवर्णः ॥ द्वौ वा इत्यादि।
इति वितरणोदान विधिः समाप्तः॥ ॥ कृष्णाख्येन विधिः समाप्तः।ः ऋषभमहादान। तिलपात्र। ह्रुतपात्र।
उपदान। एतानि लिखितानि॥ संवत् १९६० २५ वर्षे
माघ वद्य दि १ तिथौ सोम दिने। पं। चीनोकेन लिखितं॥ ॥ श्रीरस्तु॥ पत्र नव ९

[illegible] लिखितं [illegible] जीवा [illegible] ९
[illegible] पूर्ण